# Agastyakritam 01 Shiva Stotram

# અગસ્ત્યકૃતં ૧ શિવસ્તોત્રમ્

## Document Information

Text title : Agastyakritam 01 Shiva Stotram

File name : agastyakRRitaM01shivastotram.itx

Category : shiva, tAmraparNImAhAtmya, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : tAmraparNImAhAtmya | adhyAya 16/71-85||

Latest update : December 13, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 13, 2025

*sanskritdocuments.org*

# અગસ્ત્યકૃતં ૧ શિવસ્તોત્રમ્

અગસ્ત્ય ઉવાચ ।
નમઃ કલ્યાણવેષાય કલિકલ્મષનાશિને ।
નમો વિહારિણે વિશ્વવિબુધાનાં હૃદઙ્ગણે ।
નમઃ સ્વાન્તનિવાસાય શાન્તાનાં સમચેતસામ્ ॥ ૭૧॥

અસાધારણકૃત્યાય નમસ્તે કૃત્તિવાસસે ।
નીલગ્રીવાય નિત્યાય નિસ્સમાસ્યુદયાત્મને ॥ ૭૨॥

પરવામાર્ધવપુષે નમઃ ક્ષેમઙ્કરાય તે ।
અર્ધં મરકતાકારમર્ધં સ્ફટિકસન્નિભમ્ ॥ ૭૩॥

અદ્વૈતમપિ યત્તેજો દ્વૈતીભૂતં નમો નમઃ ।
કાન્તં કલ્યાણનિલયં કલિતાશેષકૌતુકમ્ ॥ ૭૪॥

કન્દર્પકોટિલાવણ્યં યુવાનં સામ્બમીશ્વરમ્ ।
મઙ્ગલાય મહસ્તોમપ્રસ્તુતાશ્ચર્યરૂપિણે ॥ ૭૫॥

ગૌરીનાથાય નાથાય નમસ્સોમાર્ધધારિણે ।
શિવાય પરિપૂર્ણાય પૂર્ણાનન્દાય વેધસે ॥ ૭૬॥

મહાવૃષભવાહાય મહાદેવાય તે નમઃ ।
શૂલિને નીલકણ્ઠાય ફાલચન્દ્રાવતંસિને ॥ ૭૭॥

ભવાય ભવનાશાય પશૂનાં પતયે નમઃ ।
જય નાથ કૃપાદૃષ્ટ્યા વત્સં સેચય માં પ્રભો ॥ ૭૮॥

મા મુઞ્ચ પાદયુગલાદનાથં ત્વત્પરિગ્રહમ્ ।
એકસ્માદાગસો દ્વાભ્યાં ત્રિભ્યો વા રક્ષ માં મુહુઃ ॥ ૭૯॥

બહુભ્યો હિ મહાદેવ માં પાહિ કરુણાનિધે ।
ત્વત્સન્નિધિવિધાનેન હૃષ્ટોઽસ્મિ નિતરાં વિભો ॥ ૮૦॥

આહ્લાદય કૃપાદૃષ્ટ્યા વૃષ્ટ્યા ભુવમિવામ્બુદઃ ।
ઘર્મતપ્તોઽધ્વગોધ્વાનમતીત્ય બહુયોજનમ્ ॥ ૮૧॥

અઙ્ઘ્રિપઙ્કેરુહચ્છાયમાપ્તં પાહિ જગદ્ગુરો ।
ન વેદ્મિ ત્વત્પદામ્ભોજાદપરં દૈવતં પરમ્ ॥ ૮૨॥

અત એવ મહાદેવ ત્વામસ્મિ શરણં ગતઃ ।
પ્રસીદ ગૌરીનાથ ત્વં પ્રસીદ ગિરિજાપતે ॥ ૮૩॥

પ્રસીદ સતતં મહ્યં નાથ કાન્તિમતીપતે ।
નમો વેણુવનેશાય મહાકલ્યાણરૂપિણે ॥ ૮૪॥

હાટકામ્ભોજિનીતીરવાસિને શૂલિને નમઃ ।
તામ્રાતરઙ્ગસઙ્ક્લિન્નપાદામ્ભોજાય તે નમઃ ॥ ૮૫॥

બ્રહ્મવૃદ્ધપુરીશાય પૂર્વપૂર્વાય તે નમઃ ।

ઇતિ તામ્રપર્ણીમાહાત્મ્યે ષોડશાધ્યાયાન્તર્ગતં
અગસ્ત્યકૃતં શિવસ્તોત્રં સમ્પૂર્ણમ્ ।

તામ્રપર્ણીમાહાત્મ્ય । અધ્યાય ૧૬/૭૧-૮૫॥

tAmraparNImAhAtmya . adhyAya 16/71-85..

Proofread by PSA Easwaran

*Agastyakritam 01 Shiva Stotram*

pdf was typeset on December 13, 2025

Please send corrections to *sanskrit@cheerful.com*